दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-176 | 1 | अप्रैल 25, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्धः ५१२६ वसन्त-ऋतुः
सूर्यः उत्तरायणः वैशाखकृष्णद्वादशी
वैशाख 12 प्रविष्टांशः मङ्गलमयः भवेत्

2 राष्ट्रीय- पञ्चायतीराज- दिवसस्य अवसरे मधुबनीनगरे प्रधानमन्त्रिणा ग्रामविकासाय दृढसंकल्पः व्यक्तः

3 सीमापर्यटनं वर्धयितुं सहायतां कुर्यात् आईटीबीपी इति, अवदत् मुख्यमंत्री सुखविन्दरसिंहसुक्खुः

4 श्रीरघुनाथकीर्तिपरिसरे देवप्रयागे भारतीय -इतिहास-अनुसन्धानपरिषदः सौजन्येन द्विदिवसीया राष्ट्रीयसंगोष्ठी

## आतङ्क्याक्रमणविषये राष्ट्रपतिना सह गृहमन्त्रिणः संगोष्ठी



हिमसंस्कृतवार्ताः - गृहमन्त्री अमितशाहः विदेश मन्त्री डॉ. एस. जयशंकरः च राष्ट्रपति भवने राष्ट्रपति- द्रौपदी मुर्मू वर्यया साकं सम्भाषणम् आचरितवन्तौ । एतत् सम्भाषणम् पहलगाम-आतङ्क्याक्रमणे पाकिस्तानं विरुध्य भारतस्य कठोर-कूटनीतिक-पादक्षेपस्य उत्थापनानन्तरम् आचरितम् अस्ति। अत्रान्तरे विदेशमन्त्रालयेन देहल्याः साउथ ब्लॉक मध्ये पहलगाम-आतङ्क्याक्रमणस्य विषये कतिपय-सुनिश्चित-देशानां राजदूतेभ्यः सूचना प्रदत्ता अस्ति। अवधेयमस्ति यद् भारतेन जर्मनी-जापान-पोलैंड-ब्रिटेन-रूस-समेतानां नक्कीषां देशानां राजदूतेभ्यः आतङ्क्याक्रमणस्य विषये सूचनाः प्रदत्ता।

## खसरा-रोगस्य रूबेला रोगस्य च निरस्तीकरणाय राष्ट्रिय- शून्य-खसरा-रूबेला उन्मूलनम् अभियानं प्रारब्धम्




हिमसंस्कृतवार्ताः - राष्ट्रिय-शून्य-खसरा-रूबेला उन्मूलन विश्व सूच्यौषधीकरणस्य सप्ताहस्य प्रथमे दिने नवदेहल्याम् ऐषमो वर्षीयम् अभियानम् शुभारब्धम् । एतद् हि षड्विंशत्युत्तर-द्वि-सहस्र-तम-वर्ष यावत् खसरा-रोगस्य रूबेला रोगस्य च निरस्तीकरणस्य भारतस्य लक्ष्ये एकः महत्वपूर्णः पदक्षेपः अस्ति। अभियानस्य आभासीयं शुभारम्भं कुर्वन् स्वास्थ्य-परिवार-कल्याण-मन्त्री जे.पी. नड्डा अवदत् यत्, अभियानमिदं बालकेभ्यः खसरा-रोगस्य रूबेला-रोगस्य च सूच्यौषधीकरणे शत-प्रतिशतं सूच्यौषधीकरणस्य लक्ष्य प्राप्तेः अवसरोऽस्ति ।

## भारतं प्रत्येकमपि आतंकवादिनां तेषां समर्थकानां चाभिज्ञानपूर्वकं तान् दण्डयिष्यति - प्रधानमन्त्री



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् भारतम्, बिहारे अवेधरूपेण निवसतां जनानाम् अभिज्ञानं करिष्यति, तेषाम् अभिज्ञानानन्तरं तान् तेषामेव मूलगृहेषु प्रेषयिष्यति । श्रीमोदिना भणितं यत् भारतम् आतंकवादिनः, तेषां समर्थकान् च नूनमेव दण्डयिष्यति। अनेन प्रोदितं यत् भारतम् एतादृशान् अवेधजनान् धरायाः अन्तिम परिधिं यावत् निवर्तयिष्यति। प्रधानमन्त्री न्यगदत् यत् आतंकवादः नात्र सहिष्यते। असौ प्रत्यपादयत् यत् न्यायं सुनिश्चेतुं सर्वसंभव- प्रयासाः करिष्यन्ते। निखिलोऽपि देशः अस्मिन् सत्सङ्कल्पे दृढः अस्ति। प्रधानमन्त्रिणा एतत् सर्वं राष्ट्रीय- पंचायती-राज-दिवसस्य अवसरे बिहारस्य मधुबनी जनपदे एकां जनसभां सम्बोधयता प्रोक्तम्। प्रधानमन्त्रीमोदी अग्रे अवदत् यत् आतंकवादस्य आक्रमणस्य आत्मा कदापि खण्डितः नैव भविष्यति । प्रधानमन्त्रिणा अस्मिन् विषयेऽपि बलं प्रदत्तं यत् मानवतायां विश्वासरताः समेऽपि जनाः भारतेन साकम् सन्ति। अमुना प्रोक्तं यत् अनया घटनया समस्तोऽपि देशः दुःखी व्यथितश्च वर्तते। अथ च पीड़ित परिवारेण साकं स्कन्धेन स्कन्धं संयोज्य तिष्ठति। स्वीय-सम्बोधनात् पूर्वं प्रधानमन्त्रिणा पहलगाम-आतंकवाद्याक्रमणे पञ्चतां प्रापितेभ्यः श्रद्धांजलि प्रदानार्थं एक-मिनट-पर्यन्तं मौनमपि धृतम्। प्रधानमन्त्रिणा बिहारे बहुमूल्यपराः भूरि आधारिक संरचना-परियोजनाः शिलान्यासपूर्वकम् उद्घाटिताः।। क्रमशः द्वितीये पृष्ठे

## पहलगाम-आतङ्क्याउतक्रमणं निध्याय सर्वकारेण समाकारितं सर्वदलीयोपवेशनम्



हिमसंस्कृतवार्ताः - पहलगाम-आतङ्क्याउतक्रमणं निध्याय सर्वकारेण समाकारितं सर्वदलीयोपवेशनं नवदेहल्यां सद्य एव समारप्स्यते । उपवेशनम् इदं संसद् भवन परिसरे आयोज्यते। गृहमंत्री अमितशाहः, विदेशमंत्री डॉ. एस् जयशंकरः, भाजपाध्यक्षः जेपीनड्डा, डीएमके दलस्य तिरुचि शिवा, एनसीपी- दल-नेता प्रफुल्ल पटेलः, एनसीपी- एसपी-दलनेत्री सुप्रियासुले, आम- आदमी-पार्टीति दलस्य संजय सिंह समेताः नैकाः नेताः उपवेशनार्थं परिसरे सम्प्राप्ताः सन्ति ।

## भाजपा-दलस्य नेतारः कार्यकर्तारश्च नवदेहल्यां पाकिस्तानोच्चायोगस्य बहिः पहलगामे आतङ्किभिः कृतमाक्रमणं विरुध्य विरोध-प्रदर्शनं कृतवन्तः



हिमसंस्कृतवार्ताः - भाजपा-दलस्य नेतारः कार्यकर्तारश्च नवदेहल्यां पाकिस्तानोच्चायोगस्य बहिः पहलगामे आतङ्किभिः कृतमाक्रमणं विरुध्य विरोध- प्रदर्शनं कृतवन्तः । भाजपा-दलस्य विधायकः सतीशोपाध्यायः संवाददातृभिः सह जातायां वार्तायां अकथयत् यत् अनया आतङ्की-घटनया देशस्य नागरिकाणां हृदयानि आक्रोशभरितानि सन्ति। सः प्रोक्तवान् यत् सर्वकारः देशस्य सेना च पाकिस्तानाय मुखभञ्जनकरं प्रत्युत्तरं दास्यतः

## सुभाषितम्

**अनाहूतः प्रविशति,**
**अपृष्टो बहु भाषते।**
**अविश्वस्ते विश्वसिति,**
**मूढचेता नराधमः॥**

भावार्थः- किसी के बिना बुलाए पहुंच जाना, बिना पूछे बहुत बोलना, जो विश्वास के योग्य न हो उस पर विश्वास करना ये सभी मूर्खों के लक्षण हैं। ऐसे मनुष्य अधम मनुष्यों की पंक्ति में आते हैं।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## उत्तरप्रदेशस्य मुख्यमंत्री योगी आदित्यनाथः शुभम-द्विवेदी इत्यस्मै पुष्पांजलिं प्रायच्छत्



हिमसंस्कृतवार्ताः - उत्तरप्रदेशस्य मुख्यमंत्री योगी आदित्यनाथः जम्मू-कश्मीरस्य पहलगामजनपदे आतङ्किभिः कृतेन प्रहारेण हतिङ्गतस्य शुभम-द्विवेदी इत्यस्य आवासम् अगच्छत्, कानपुरे तस्यान्तिमसंस्कारात् पूर्वं तस्मै पुष्पांजलिं च प्रायच्छत् । मुख्यमंत्रिणा परिवारेण सह मेलनं विधाय, स्वकीया संवेदना व्यक्तीकृता अथ च परिवाराय राज्यसर्वकार-पक्षतः सर्वसंभव- समर्थनम् आश्वासितम् ।

## मधुबनी क्षेत्रे अशीत्युत्तर-चतुः शताधिक त्रयोदश-सहस्र कोटि-रूप्यकतोऽपि अधिक मूल्यानाम् अनेक-विकास-परियोजनानाम् शिलान्यासाः

प्रधानमन्त्रिणा बिहार-यात्रायाः अवसरे अशीत्युत्तर-चतुः शताधिक त्रयोदश-सहस्र कोटि-रूप्यकतोऽपि अधिक मूल्यानाम् अनेक-विकास-परियोजनानाम् शिलान्यास-पूर्वकम् उद्घाटनं कृत्वा राष्ट्राय समर्पणं कृतम् । यासां परियोजनानाम् उद्घाटनपूर्वकं कार्यं प्रारब्धम् तेषु गोपालगंजे एल.पी.जी. बॉटलिंग प्लांट परियोजना, विद्युतीकरण परियोजना, आवास योजनाः, रेल-अवसंरचनाः, मार्गविकास योजनाश्च सम्मिलिताः सन्ति। प्रधानमन्त्री मोदी बिहार-यात्रावसरे सप्तत्युत्तर-अष्टशत-कोटि-रूप्यकाणां रेल-परियोजनानाम् उद्घाटनं कृतम्। अथ च चतुर्थ्यः रेलयानेभ्यः हरित-ध्वज प्रदर्शनमपि कृतम्। अमुना मधुबनी जनपदे राष्ट्रीय पंचायती राज दिवसस्य अवसरे आयोजिते एकस्मिन् कार्यक्रमे वीडियो कॉन्फ्रेंसिंग इति माध्यमेन जयनगर-पटना-नगरयोः मध्ये नमो भारत-रपिंड-रेल-यानम्, सहरसा-लोकमान्य तिलक टर्मिनस तः मुंबई-नगरं यावत् अमृत-भारत-एक्सप्रेस-रेलयानं च प्रचालयितुं हरितध्वजः प्रदर्शितः। एतद् हि देशस्य द्वितीयं नमो भारतं रेल-यानम् अस्ति, एतद् अतिरिच्य, चलच्चित्र-मन्त्री अपि यात्रि-वाहि-रेलयान-द्वयाय हरित ध्वजं प्रादर्शयत् एकं रेलयानं सहरसा-तः पिपरा पर्यन्तम् अपरं च समस्तीपुर-तः सहरसा पर्यन्तम्।

## जम्मू-कश्मीरे उधमपुर-जनपदे सुरक्षाबलस्य आतङ्कि-गुल्मस्य च मध्ये अन्वेषणाभियानस्य अनन्तरं गोलिका प्रहार-संघर्षे सैन्यबलस्य एको भटः वीरगतिं प्राप्तः



हिमसंस्कृतवार्ताः - जम्मू-कश्मीरे उधमपुर-जनपदे सुरक्षाबलस्य आतङ्कि-गुल्मस्य च मध्ये अन्वेषणाभियानस्य अनन्तरं गोलिकाप्रहाराः जाताः, यस्मिन् गोलिका प्रहार-संघर्षे सैन्यबलस्य एको भटः राष्ट्र-रक्षा-यज्ञस्य बलिवेदिकायां हुतिंगतः। प्राप्तावार्तानुसारेण डुडू-बसंतगढ-क्षेत्रे आतंकवादिनां निगूहनस्य सूचनायाः आधारे सुरक्षाबलेन अत्रत्यं क्षेत्रं परिधीकृत्य अन्वेषणाभियानं प्रारब्धम्। तदा यदा सुरक्षा-बलानि सन्दिग्ध-स्थानं निकषा प्राप्तानि, तदा तत्र निगूढ-आतंकवादिभिः गोलिका-वर्षणं प्रारब्धम्, प्रत्युत्तरे सुरक्षाभटाः अपि गोलिकाः प्रहतवन्तः, येन संघर्षः समेधितः।

## भारतेन पहलगाम-आतङ्कवाद्याक्रमणानन्तरं पाकिस्तान-नागरिकेभ्यः वीजा सेवायाः तत्काल-प्रभावेण निलम्बनस्य कृतः निर्णयः

हिमसंस्कृतवार्ताः - पहालगामजनपदे आतङ्किभिः कृतमाक्रमणं विरुध्य भारतसर्वकारेण पाकिस्तानस्य नागरिकाणाम् आव्रजनानुमति-पत्रकं निरस्तम् । आव्रजनानुमति-पत्रकं विरुध्य एतत् निरस्तीकरणं अस्य मासस्य सप्तविंशति-दिनाङ्कात् प्रभावमागमिष्यति ।

## विपक्षनेता राहुलगान्धी अद्य गमिष्यति जम्मूकश्मीरस्य पहलग्रामे



नई दिल्ली। लोकसभायां विपक्षनेता राहुलगान्धी पहलगाम-आक्रमणस्य द्विदिवसानन्तरं शुक्रवासरे जम्मू-कश्मीरस्य भ्रमणं करिष्यति। काङ्ग्रेस-स्रोताः गुरुवासरे अवदत् यत् अस्मिन् काले राहुलगान्धी पहलगाम-आतङ्क-आक्रमणे घातितानां जनानां साक्षात्कारं करिष्यति। सः अवदत् यत् राहुलगान्धी आहतानाम् स्थितिं ज्ञातुं अनन्तनागस्य शासकीयचिकित्सा महाविद्यालयं गमिष्यति

## राष्ट्रीय- पञ्चायतीराज- दिवसस्य अवसरे मधुबनीनगरे प्रधानमन्त्रिणा ग्रामविकासाय दृढसंकल्पः व्यक्तः




**हिमसंस्कृतवार्ताः-** प्रधानमन्त्री नरेन्द्रमोदी बिहारस्य मधुबनी क्षेत्रे एकां जनसभां सम्बोधितवान्, तेनोक्तं यत् मधुबनी "प्रारम्भे अहम् एकां प्रार्थनां कर्तुमिच्छामि। भवन्तः यत्र यत्र स्थिताः सन्ति, तत्रैव उपविष्टा एव सन्तु। स्थित्वा न कर्तव्यम्। २२ अप्रील् दिनाङ्के यान्यान् आत्मीयान् वयं लब्धविलोकनान्, तेषां प्रति श्रद्धाञ्जलिं दातुं भगवत्स्मरणं कृत्वा क्षणमेकं मौनव्रतमुपविशत। ततोऽहम् भाषणं प्रारभे। ॐ शान्तिः शान्तिः शान्तिः। भारतस्य प्रधानमन्त्री नरेन्द्रमोदीवर्यः बिहारराज्यस्य मधुबनीनगरे आयोजिते "राष्ट्रीय- पञ्चायतीराज- दिवसस्य" विशेषकार्यक्रमे सहभागी सन् जनसमुदायं प्रति समुत्कण्ठं सम्बोधनं कृतवान्। ग्रामस्वराज्यस्य सुदृढीकरणं पञ्चायतीराजव्यवस्थायाः महत्त्वं च प्रतिपादयन् एषः कार्यक्रमः राष्ट्रजीवनस्य एकः ऐतिहासिकः क्षणः जातः।

### मखानस्य वैश्विकविस्ताराय प्रधानमन्त्रिणः दृढप्रतिज्ञा

प्रधानमन्त्रीवर्येण उक्तम्– "मखानं केवलं खाद्यवस्तु नास्ति, अपितु मिथिलायाः सांस्कृतिकं गौरवचिह्नं च।" सः स्मारितवान् यत् मखानस्य GI-पञ्जीकरणं वर्तमानसर्वकारेण सम्पादितम्, मखानबोर्डस्य स्थापनया कृषकाणां जीवनोत्कर्षाय मार्गः प्रशस्तः। अन्तरराष्ट्रीयविपणिषु अपि मखानस्य प्रतिष्ठा वर्धयितुं व्यापकः प्रयासः आरब्धः अस्ति।

### पञ्चायतीराजसंस्थायाः सशक्तिकरणम्- डिजिटल्क्रान्त्या सह

प्रधानमन्त्रीवर्येण उद्घोषितं यत् गतदशवर्षेषु पञ्चायतीराजसंस्थायाः सशक्तिकरणाय भारतसर्वकारेण नानाविधाः योजनाः प्रवर्तिताः। द्विलक्षाधिकाः ग्रामपञ्चायताः इंटरनेट-संयोजनेन युक्ताः सन्ति। ग्रामवासिनां कार्याणि, यथा– जन्ममरणप्रमाणपत्रप्राप्तिः, भूमिस्वामित्वदाखिला इत्यादिकम् अपि डिजिटलरूपेण सुलभतया सम्पद्यन्ते।

### महिलासशक्तिकरणे बिहारराज्यस्य पथप्रदर्शकभूमिका

महिलानां सामाजिक- राजनीतिक- सशक्तिकरणाय प्रधानमन्त्रिणा बिहारराज्यस्य प्रशंसा कृता, यत्र पञ्चायतीराजसंस्थायाम् पञ्चाशत्- प्रतिशतम् आरक्षणं महिलाभ्यः प्रदत्तम्। सः उक्तवान्– "यदा बालिकाः निर्णयकर्त्रीभवन्ति, तदा समाजस्य दिशा अपि नवीना भवति।" केन्द्रे अपि महिलानां आरक्षणं सशक्तीकृतम्। लोकसभा-विधानसभयोः त्रयस्त्रिंशत् प्रतिशतम् आरक्षणं सुनिश्चितम्।

### "लखपतिदीदी" संकल्पस्य साकारता आवासयोजनायाः माध्यमेन

प्रधानमन्त्रीवर्येण आवासयोजनायाः प्रसङ्गः अपि उल्लिखितः, यत्र गतदशवर्षेषु चत्वारि कोट्यधिकानि पक्वगृहाणि निर्मितानि। बिहारराज्ये सप्तपञ्चाशत् लक्षपरिवाराः लाभं प्राप्तवन्तः। बहूनि गृहाणि महिलानां नाम्ना स्वीकृतानि, यः "लखपतिदीदी" संकल्पः यथार्थतां प्राप्तवान् इति प्रधानमन्त्रिणा निवेदितम्।

### प्लवनस्य निवारणाय केन्द्रसर्वकारस्य महायोजना

प्रधानमन्त्रीवर्येण उद्घोषितं यत् कोसीक्षेत्रे पुनः पुनः आगच्छतः जलोपप्लवस्य समाधानाय केन्द्रसर्वकारेण एकादशसहस्रकोटिरूप्यकाणां महायोजना प्रवर्तिता। गण्डक, कोसी, बागमती इत्यादीनां तटबन्धनिर्माणं, नहरसंवर्धनं च कृषकहिताय सुसम्पन्नम् इति सः अवदत्।

### स्वास्थ्यसेवायाम् अभूतपूर्वविकासः

प्रधानमन्त्रिणा सूचितम् यत् दरभंगायां अखिलभारतीय- आयुर्विज्ञानसंस्थानस्य (AIIMS) निर्माणकार्यं तीव्रेण वेगेन प्रवर्तते, झंझारपुरे च नूतनमेकं चिकित्सामहाविद्यालयः स्थाप्यते। एतेन मिथिलांचलस्य जनतायाः स्वास्थ्यसेवायाम् अद्वितीयविकासः भविष्यति।



### आतंकवादं प्रति राष्ट्रस्य शून्यसहनशीलता

जम्मूकश्मीरस्य पहलगामे जातायाः आतंकवादीहिंसायाः सन्दर्भे प्रधानमन्त्री गम्भीरं शोकं प्रकट्य उक्तवान् यत् भारतम् आतंकवादं कदापि सहनं न करिष्यति। निर्दोषजनानां वधः न कदापि क्षम्यते, अपराधिनः निश्चितं दण्डं लप्स्यन्ते।

# सीमापर्यटनं वर्धयितुं सहायतां कुर्यात् आईटीबीपी इति, सीमासेनानायकेन संजयगुञ्ज्यालेन साकं वार्तायाम् अवदत् मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः देहरादूनस्य भारत-तिब्बती सीमापुलिसबलस्य उत्तरसीमा मुख्यालयस्य सीमासेनापतिं संजय गुञ्ज्यालं मिलितवान्। अस्मिन् सत्रे राज्यस्य सीमान्तजनपदेषु किन्नौर-लाहौल-स्पितिषु आईटीबीपी इत्यस्य भूमिकायाः विषये भारत-चीन-सीमासुरक्षासम्बद्धेषु विषयेषु च विस्तृतचर्चा कृता अस्मिन् अवसरे राज्यस्य सीमापूर्वक्षेत्रेषु सीमापर्यटनस्य प्रवर्धनार्थं कार्ययोजना, सीमाग्रामीणक्षेत्रेभ्यः आईटीबीपी इत्यस्य आपूर्तिं कर्तुं स्थानीयोत्पादानाम् क्रयणं, आईटीबीपी-स्वास्थ्यसंस्थानां माध्यमेन जनानां कृते चिकित्सासुविधाः प्रदातुं इत्यादयः विविधाः विषयाः अपि चर्चा कृता। मुख्यमन्त्री उक्तवान् यत् राज्ये आपदाप्रबन्धनं दृष्ट्वा आईटीबीपी क्षेत्रीयप्रतिक्रियाकेन्द्रैः सह उत्तमसमन्वयः स्थापितः भविष्यति। सः अवदत् यत् राज्यस्य विभिन्नेषु आईटीबीपी क्षेत्रेषु स्थितानां चक्रविमानस्थलानाम् उपयोगेन दूरस्थक्षेत्रेषु पर्यटनस्य प्रचारः कर्तुं शक्यते। एतदर्थं बलेन सह विस्तृतविमर्शानन्तरं सर्वाः औपचारिकताः सम्पन्नाः भविष्यन्ति। अनेन संचारसुविधाः अपि सुदृढाः भविष्यन्ति। सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः ग्रामीण अर्थव्यवस्थां सुदृढं कर्तुं अनेकानि पदानि गृह्णाति। ग्रामीणार्थव्यवस्थां सुदृढं कर्तुं यदि आईटीबीपी स्थानीयजनानाम् खाद्यपदार्थानाम् क्रयणं करोति तर्हि तेन जीविकायाः अवसराः सृज्यन्ते, कृषकाणां उद्यानपालकानां च लाभः भविष्यति। मुख्यमन्त्री बलाधिकारिभ्यः अवदत् यत् सीमाक्षेत्रेषु विविधनिर्माणकार्यस्य सर्वाः औपचारिकताः सम्पन्नं कृत्वा स्थानीयजनानाम् कृते विशेषप्राथमिकता दातव्या। सः राज्यसर्वकारस्य अधिकारिणः सीमाक्षेत्रेषु संचारगोपुरस्थापनस्य सर्वाः प्रक्रियाः समये एव सम्पन्नं कर्तुं निर्देशं दत्तवान्। मुख्यमन्त्री सीमाक्षेत्रेषु आईटीबीपीद्वारा क्रियमाणानां विकासकार्याणाम् अन्यकार्यस्य च प्रशंसाम् अकरोत्। सेनापतिः संजय गुञ्ज्यालः वाईबेंट ग्रामीणविकासकार्यक्रमस्य अन्तर्गतं सांगला उपत्यकायां कौरिकक्षेत्रे च प्रस्तावितानां त्रयाणां नवीनमार्गाणां निर्माणार्थं आईटीबीपी द्वारा कृतानां पदानां विषये अपि च राज्यस्य दूरस्थेषु अग्रे सीमाक्षेत्रेषु प्रस्तावितानां १५ नवीनमार्गाणां प्रस्तावस्य विषये अपि बोधितवान्। उपमुख्यमन्त्री मुकेश अग्निहोत्री आभासीय-रूपेण सभायां भागं गृहीतवान्

## रजनी पाटिल शिमलां प्राप्ता, काङ्ग्रेसः शुक्रवासरे सिक्थवर्तिकायात्राम् करिष्यति



हिमसंस्कृतवार्ताः- शिमला। जम्मूकश्मीरस्य पहलगामे आतङ्कवादी-आक्रमणे मृतानां सम्मानार्थं, तेषां आत्मनः शान्त्यर्थं च राज्यकाङ्ग्रेसपक्षः शुक्रवासरे शिमलानगरे सिक्थवर्तिकायात्राम् करिष्यति। कार्यक्रमे भागं ग्रहीतुं राज्यप्रभारी रजनी पाटिल गुरुवासरे सायं शिमलानगरं प्राप्तवती।

सह प्रभारी चेतनचौहानः, प्रदेश काँग्रेसाध्यक्षा प्रतिभासिंहः, मुख्यमंत्री सुखविंदरसिंहसुक्खुः, उपमुख्यमंत्री मुकेश अग्निहोत्री, मन्त्रिमण्डलस्य सर्वे सदस्याः, विधायकाः, शिमलानगरनिगमस्य महापौरः, उपमहापौरः, सर्वे पार्षदाः, अग्रणी सङ्घटननां सर्वे पदाधिकारिणः एवं कार्यकर्तारः अस्यां यात्रायां भागं ग्रहीष्यन्ति। शेर-ए-पञ्जाबतः सायं सार्धषड्वादने सिक्थवर्तिकायात्रा आरभ्यते, रिजग्राउण्ड इत्यत्र राष्ट्रपितुः महात्मागान्धी इत्यस्य प्रतिमायाः सम्मुखे समाप्ता भविष्यति। राज्यकाङ्ग्रेसस्य अध्यक्षा प्रतिभासिंहः सर्वेभ्यः दलनेतृभ्यः कार्यकर्तृभ्यः च आग्रहं कृतवती यत् ते दिवंगतानां प्राणानां शान्त्यर्थं अस्यां सिक्थवर्तिकायात्रायां सम्मिलिताः भवेयुः।

## संसारीनालाचेकपोस्टतः किलाडं प्रति प्रवेशः अधुना परिचयपत्रं दर्शयित्वा एव भविष्यति, सचेतना प्रसारिता

हिमसंस्कृतवार्ता:- चम्बा। अधुना जम्मूकश्मीरसीमायाः समीपस्थे पाङ्गीक्षेत्रे संसारीनाला-निरीक्षणस्थलतः परिचयपत्रं दर्शयित्वा एव किलाडं प्रवेशं दास्यते। पहलगामे आतङ्कवादीनाम् आक्रमणस्य अनन्तरं संसारीनाला चेकपोस्ट इत्यत्र सचेतना प्रसारिता अस्ति। अस्य अतिरिक्तं यदि कोऽपि श्रमिकः जम्मूकश्मीरतः श्रमकार्यार्थं वा दैनिकवेतनार्थं वा पाङ्गीम् आगच्छति अथवा कार्यसंचालकेन आनयते तर्हि तस्य आधारपत्रं, खाद्यान्नपत्रम् इत्यादिभिः सहितं तस्य सम्पूर्णविवरणं किलाडपुलिसस्थानके पञ्जीकरणं कर्तव्यं भविष्यति। तदा एव तेषां पाङ्गीक्षेत्रे निवासस्य, कार्यस्य च अवसरः प्राप्स्यते। आतङ्कवादीनां घटनायाः अनन्तरं पाङ्गी-क्षेत्रस्य सीमान्तक्षेत्रेषु सुरक्षाव्यवस्थाः वर्धिताः सन्ति। पुलिसचौकीषु, नाकास्थानेषु च कार्यरताः पुलिसकर्मचारिणः प्रत्येकं वाहनस्य सम्यक् निरीक्षणं कृत्वा एव जनान् किलाडसीमायां प्रवेशं ददति। एतदतिरिक्तं पुलिसनिरीक्षणम् अपि वर्धितम् अस्ति। अस्मिन् क्रमे अधुना I-card विना चेकपोस्ट संसारीनाला (Sansari Nala) इत्यस्मात् कोऽपि अज्ञातः व्यक्तिः प्रवेशं न प्राप्स्यति। गुरुवासरे सुरक्षाव्यवस्थानां निरीक्षणार्थं थानाप्रभारी पाङ्गी चेकपोस्टं प्राप्य नियुक्तसैनिकेभ्यः आवश्यकमार्गदर्शिकाः निर्गतवान्।




*संसारीनालातः किलाडं प्रति आगच्छन्तं प्रत्येकं चालकं व्यक्तिं च स्वस्य परिचयपत्रं दर्शयित्वा एव प्रवेशं प्राप्स्यति। जम्मूकश्मीरतः श्रमिकरूपेण कार्यं कर्तुम् आगच्छन्तः जनाः अथवा श्रमिकान् आनयन्तः निविदाकर्तारः स्वस्य आधारपत्रस्य खाद्यान्नपत्रस्य च आधारेण श्रमिकाणां पुलिसस्थानके पञ्जीकरणं कर्तुं प्रवृत्ताः भविष्यन्ति इति कथितम्। नियमानुसारं ये न कुर्वन्ति तेषां विरुद्धं कार्यविधिः क्रियते।*

**-जोगेन्द्र सिंह जरायल,**
**थानाध्यक्ष पांगी**

## श्री गोवर्धनदासः राजकीय- उच्च- विद्यालय- बिजन- ढलवानाय दशसहस्ररुप्यकाणि दत्तवान्



हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी। राजकीय- उच्चविद्यालयस्य बिजन-ढलवानस्य कृते विशेषः प्रेरणादायकः दिवसः आसीत्। लोकनिर्माणविभागात् सेवानिवृत्तः मान्यः गोवर्धनदासः विद्यालयविकासाय दशसहस्ररुप्यकाणां सहयोगराशिः दानरूपेण दत्तवान्।

एतत् योगदानं न केवलम् आर्थिकसमर्थनस्य प्रतीकम् अपि तु छात्राणां प्रति तस्य गहनसंवेदनशीलतां शिक्षाप्रति समर्पणं च प्रतिबिम्बयति। श्रीगोवर्धनदासाय अस्य उदात्तकार्याय विद्यालयप्रबन्धनेन एवं सर्वैः शिक्षकैः हार्दिकः आभारः प्रकटितः। अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्या मोनिकाठाकुर हिमाचलीय- परम्परानुसारं शिरस्त्राणं दत्त्वा तस्य सम्मानं कृतवती। स्वसम्बोधने मुख्याध्यापिका अवदत्, “श्रीगोवर्धनदासस्य एतत् योगदानम् अन्येभ्यः समाजसेवकेभ्यः पूर्वविद्यार्थिभ्यः च अवश्यमेव प्रेरणा दास्यति। तस्य सहकार्यं विद्यालयस्य शैक्षणिक- भौतिकप्रगतेः कृते उपयोगी सिद्धं भविष्यति।” श्री गोवर्धनदासेन अपि विद्यालयपरिवारेण सह वार्तालापस्य मध्ये उक्तं यत् एतत् विद्यालयं तस्य हृदयस्य अत्यन्तं समीपस्थम् अस्ति तथा च भविष्ये अपि विद्यालयस्य आवश्यकतानुसारं सर्वसम्भवं साहाय्यं निरन्तरं करिष्यति। अद्यतनीयाः सन्ततिः मादकद्रव्यव्यसनस्य पङ्के निमग्ना, यस्य कृते अस्माभिः अपि कार्यं कर्तव्यम्। एतत् सर्वकारस्य अपि च समाजस्य प्रत्येकस्य वर्गस्य दायित्वम् अस्ति। समाजाय नूतनां दिशां दातुं विद्यालयाः सहायकाः भवन्ति, अतः सर्वैः अभिभावकैः स्वविद्यालयस्य उत्थानार्थं यथाशक्ति प्रयत्नः करणीयः। अस्य उदात्तकार्यस्य कृते विद्यालयपरिवारः पुनः तस्मै कृतज्ञतां प्रकटितवान्, तस्य सुस्वास्थ्यस्य दीर्घायुषः च कामनाम् अकरोत्। अस्मिन् अवसरे विद्यालयस्य सर्वे शिक्षकाः उपस्थिताः आसन्।

# संस्कृतविद्यालय भुवनेश्वर्यां प्रवेशोत्सवस्य आयोजनम्



हिमसंस्कृतवार्ता:- आचार्य नवीन ममगाईं, पौडी गढवाल उत्तराखण्ड:। अप्रैल मासस्य चतुर्विंशति दिनाङ्के भुवनेश्वरी- ब्रिगेडियर- विद्याधर-जुयाल संस्कृत विद्यालये नवप्रवेशिकानाम् प्रवेशोत्सवः हर्षोल्लासेन आयोजितम्। अयं उत्तराखण्डस्य प्रतिष्ठितः गुरुकुलः अस्ति, यत्र राज्यस्य विभिन्नदनपदेभ्यः अपि च दिल्ली- पञ्जाब- आदिप्रान्तेभ्यः अपि छात्राः प्रतिवर्षं प्रवेशं गृह्णन्ति। यतो हि एषः आवासीयविद्यालयः अस्ति, अतः छात्राः शिक्षकाणां मार्गदर्शने दिवारात्रौ परिश्रमं कुर्वन्ति, यस्मात् कारणात् ते बोर्डपरीक्षायाम् अन्यस्मिन् वा क्षेत्रे सर्वदा सर्वोच्च प्रदर्शनं कुर्वन्ति। प्रबन्धक राजेन्द्र जुयालः प्राधानाचार्य अनसुया प्रसादवर्येण शुभकामनाः प्रेषितम्। वरिष्ठाध्यापकः नवीन जुयालः सर्वान् सम्बोधयन् अवदत् यत् अद्य यथा उत्साहेन भवन्तः अद्य सम्मानं प्राप्नुवन्ति, तस्मिनेव उत्साहेन भवान् समर्पणेन अत्र बहु परिश्रमं करिष्यन्ति, यस्य परिणामः वयं भविष्ये द्रक्ष्यामः। आचार्य नवीन ममगाई इत्यनेन उक्तं यत् अस्मिन् वर्षे त्रिंशत छात्राः विद्यालये प्रवेशं गृहीतवन्तः। वाद्ययन्त्रैः वैदिकमन्त्रैः च सर्वे सताधिक अध्ययनशीलाः छात्राः विद्यालयपरिवारे नवप्रवेशकानां स्वागतं कृतवन्तः। अस्मिन्नवसरे अनूप कुकरेती:, ईशान डोभालः, कमलदीप पोखरियाल, नीरज पटवाल, आशीष डाबराल:, अंकित मैठाणी इत्यादयः उपस्थिता आसन्।

# पटना - सेवाबस्त्यां दशदिवसीय-संस्कृतसंभाषणशिविरारम्भः



"संस्कृतभारती" इत्यस्याः संस्कृतसेवार्थं विशिष्टः यत्नः, पट्टनानगरस्य राजेन्द्रनगरप्रदेशे सेवाबस्त्यां (वार्डसंख्या ४३) २२ अप्रैल् दिनांके दशदिवसीयः संस्कृतसंभाषणशिविरः संस्कृतभारत्याः आयोजनेन आरब्धः। एषः शिविरः नेत्रचिकित्सालयसमीपे सञ्चाल्यते।अस्मिन् विशिष्टे शिविरे बस्तिस्थाः सर्वे बालकाः किशोराश्च निःशुल्कं संस्कृतभाषायाः श्रवणं, वाचनं, लेखनं, संभाषणं च शिक्ष्यन्ते। एषः शिविरः केवलं भाषाशिक्षणमात्रं नास्ति, अपितु संस्कृतभाषायाः माध्यमेन जीवनमूल्यानां पुनर्संस्थापनं, आत्मविश्वासस्य संचारश्च लक्ष्यीकृत्य आयोजितः। शिविरे बालकानां सहभागिता अत्यन्तम् उत्साहजनकं दृश्यते। प्रतियुवकेषु संस्कृतभाषायाः विषये नवीनजिज्ञासा, नवशक्तिश्च अवलोक्यते।संस्कृतभारत्याः एषः उपक्रमः "सेवायां संस्कृतम्" इति भावं साक्षात्करोति। सेवाबस्तिसमानप्रदेशेषु संस्कृतभाषायाः प्रचारप्रसारं प्रति एषा योजना भाषायाः सम्मानबोधं, आत्मगौरवञ्च समाजे जागरयति। एवं शिविरस्य माध्यमेन संस्कृतभाषायाः जीवद्रूपं समाजे प्रकाश्यते – यत्र सा केवलं पाठ्यविषयः नास्ति, अपि तु दैनन्दिनसंवादस्य सशक्तमाध्यमं भवति।एवं प्रकारैः उपक्रमैः भविष्ये संस्कृतभाषायाः पुनरुत्थानं निश्चितं प्रतितिष्ठते इत्याशा दृश्यमाना अस्ति।शिविरसंचालकः च शिक्षकः च — अंकुशकुमारः एव। संस्कृतभारती पट्ना-महानगरविस्तारकः अपि सः एव।

# श्रीरघुनाथकीर्तिपरिसरे देवप्रयागे भारतीय -इतिहास-अनुसन्धानपरिषदः सौजन्येन द्विदिवसीया राष्ट्रीयसंगोष्ठी




हिमसंस्कृतवार्ता:। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे देवप्रयागे भारतीय -इतिहास-अनुसन्धानपरिषदः सौजन्येन द्विदिवसीया राष्ट्रीयसंगोष्ठी १२-१३ एप्रिल् २०२५ तमे दिनाङ्के आयोजिता। सा संगोष्ठी ऑनलाइन-ऑफलाइनरूपेण सम्पन्ना। देवप्रयागपरिसरस्य यूट्यूबचेनलमध्ये तस्याः प्रसारणं कृतम्। संगोष्ठीविषयः आसीत् – "संस्कृतसाहित्य-ऐतिहासिकानुसन्धानयोः अन्तःसम्बन्धस्यान्वेषणमं संस्कृताख्यानानाम् अनावरणञ्च । उद्घाटनसत्रं १२ एप्रिल् २०२५ तमे दिनाङ्के परिसरस्य प्रशासनिकभवने संगोष्ठीमण्डपे सम्पन्नम्। उद्घाटनसत्रे मुख्यातिथिरूपेण दिल्लीविश्वविद्यालयस्य सेंट् स्टीफन्स्महाविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो॰ पंकजकुमारमिश्रः उपस्थितः। विशिष्टातिथिरूपेण जाकिरहुसैनमहाविद्यालयस्य संस्कृतविभागाध्यक्षा प्रो॰ सरस्वती उपस्थितासीत्। सारस्वतातिथिरूपेण हरिसिंहगौरकेन्द्रीयविश्वविद्यालयस्य (सागर, मध्यप्रदेशे) संस्कृतविभागस्य सहायकाचार्यः डॉ॰ नोनीहालगौतमः अवर्तत। मुख्यातिथिभिः उक्तं यत् – इतिहाससंशोधनाय संस्कृतभाषा साहित्यञ्च अतिमहत्साधनम्। प्रो॰ सरस्वत्याः कथने संस्कृताख्यानानाम् ऐतिहासिकनिरूपणम् उल्लेखितम्।

डॉ॰ नौनीहालगौतममहोदयेन संस्कृतसाहित्ये इतिहासस्य काव्यपक्षः विशदीकृतः। सर्वे वक्तारः कौटिल्यस्य अर्थशास्त्रम्, कल्हणस्य राजतरङ्गिणी, रामायणम्, महाभारतम्, वेदाः, उपनिषदः, पुराणानदीनि च इतिहासदृष्ट्या महत्त्वपूर्णानि इत्युक्तवन्तः।दर्शनविभागस्य सहाचार्यः डॉ॰ सच्चिदानन्दस्नेहीमहोदयः कार्यक्रमस्य प्रस्तावनां प्रस्तुतवान्। सत्रस्य संचालनं ज्योतिषविभागस्य सहायकाचार्यः रजतगौतमछेत्रीमहोदयेन कृतम्। मंगलाचरणं, दीपप्रज्वलनं, वैदिकमन्त्रपाठेन च उद्घाटनम् जातम्। सर्वेऽतिथयः माल्यार्पणेन, स्मृतिचिह्नप्रदानेन पुस्तकदानेन च सत्कृताः। अध्यक्षता उपनिदेशिका प्रो॰चन्द्रकलाआर्.कोण्डीमहोदयया निर्वोढा। शान्तिपाठेन उद्घाटनसत्रस्य समापनमभूत्। तकनीकीसत्रं १२ एप्रिल् मध्यान्हे २.३०–५.०० वादने आयोजितम्। सत्रे प्रो॰ पंकजकुमारमिश्रः, प्रो॰ सरस्वती, डॉ॰ नोनीहालगौतमः, संयोजकः डॉ॰ सच्चिदानन्दस्नेही च प्रतिभागिनां शोधपत्राणां समालोचनां कृत्वा मार्गदर्शनं कृतवन्तः। प्रतिवेदनं डॉ॰ सच्चिदानन्दस्नेहीमहोदयः प्रस्तुतवान् – ६५ शोधपत्राणि प्रस्तुतानि, १० व्याख्यानानि जातानि। ऑनलाइन – २७, ऑफलाइन – ३८ प्रतिभागिनः। ५ श्रेष्ठशोधपत्रवाचकाः पुरस्कारार्थं चयनिताः (राशिः – ₹१०००)। विजेताः साक्षीकुमारी, डॉ॰ श्रीओमशर्मा, रजिया अंसारी, गोकुलचन्द्रः, मथुरागजानन्दाङ्के। अन्ते – धन्यवादज्ञापनं, सामूहिकछायाचित्रं, किट्बैग-वितरणं, अङ्गवस्त्रं, पुरस्कारवितरणं च सम्पन्नम्। सर्वे एकत्र मिलित्वा उत्साहेन, सन्तोषेन च भविष्येऽपि कार्यक्रमाणां सम्भावनां प्रकटीतवन्तः।अस्मिन्नवसरे डॉ. श्री ओम शर्मा, डॉ. मनीष शर्मा, डॉ. अरविंद सिंह गौर, श्री जनार्दन सुबेदी, डॉ. अमंद मिश्र, डॉ. संगीता जी एवं डॉ. नोनिहाल गौतममहोदयसहित अन्ये प्रख्यातविद्वान्सः उपस्थिताः आसन् ।